(गुणादयोऽस्य जीवन्तीशब्दे ज्ञेयाः॥)

क्षय्यं, त्रि, (क्षेतुं शक्यम्। क्षि + "क्षय्यजय्यौ शक्यार्थे"।६।१।८१। इति यत्।) क्षयणीयम्। क्षयितव्यम्। क्षययोग्यम्। इति व्याकरणम्॥ "क्षेतुं नेतुं योग्यं क्षेयं पापं जेयं मनः"। इति सिद्धान्तकौमुदी॥ (यथा, महाभारते।
"अपवर्गे तु वैश्यस्य श्राद्धकर्म्मणि भारत!।
अक्षय्यमभिधातव्यम्" इति॥)

क्षर, ज सञ्चलने। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्। क्वचित् सकञ्च।) ज, क्षारः क्षरः। सञ्चलनमिह मोचनं स्रवणञ्च। आदौ सकर्म्मकः। "स्रोतोभिस्त्रिदशगजा मदं क्षरन्तः"। इति किराते।७।८। स्रवणे तु। क्षरत् क्षतजमक्षयः। इति दुर्गादासः॥

क्षरं, क्ली, (क्षरति स्रवति वर्षति च। क्षर् + अच्।) जलम्। तथा च सत्यसाविन्द्योपनिषदि।१।८।१०। "क्षरन्त्वविद्या ह्यमृतं तु विद्या"॥) मेघे पुं। इति मेदिनी॥

क्षरः, पुं, (क्षर् + अच्।) नश्वरवस्तु। यथा,—
"द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च।
क्षरः सर्व्वाणि भूतानि कूटस्थोऽक्षर उच्यते"॥
इति श्रीभगवद्गीतायाम्।१५।१७।
"क्षरश्चाक्षरश्चेति द्वाविमौ लोके प्रसिद्धौ। तावेवाह तत्र क्षरः पुरुषो नाम सर्व्वाणि भूतानि ब्रह्मादिस्थावरान्तानि शरीराणि अविवेकिलोकस्य शरीरेष्वेव पुरुषत्वप्रसिद्धेः। कूटो राशिः शिलाराशिः। पर्व्वत इव एकदेशेषु नश्यत्स्वपि निर्व्विकारतया तिष्ठतीति कूटस्थश्चेतनो भोक्ता स त्वक्षरः पुरुष उच्यते विवेकिभिः"। इति तट्टीकायां श्रीधरस्वामी॥ (तथा, महाभारते।१४। अनुगीतापर्व्वाध्याये।१७।१७।
"ततः सवेदनः सद्यो जीवः प्रच्यवते क्षरात्"॥)

क्षरणं, क्ली, (क्षर् + भावे ल्युट्।) मोचनम्। स्रवणम्। (यथा, रघुः।१९।१९।
"सौख्यमेत्य मृदितीपरिग्रहात्
नर्त्तकीष्वसुलभासु तद्वपुः।
वर्त्तते स्म सकथञ्चिदालिख-
न्नङ्गुलीक्षरणसन्नवर्त्तिका"॥)

क्षरी, ( न् ] (क्षरः क्षरणं वर्षणं अस्त्यस्मिन् काले क्षरोऽस्त्यस्य वा। क्षर् + इनिः।) वर्षाकालः इति हेमचन्द्रः। क्षरणविशिष्टे त्रि॥

क्षल, क शौचे। इति कविकल्पद्रुमः। (चुरां-परं-सकं-सेट्।) शौचमिह शुद्धीकरणम्। क, क्षालयति पात्रं पयसा लोकः। इति दुर्गादासः॥

क्षल, ज चाले। चये। इति कविकल्पद्रुमः। (भ्वां-परं-अकं-सेट्।) ज, क्षालः क्षलः। चालः कम्पः। चयश्चयनम्। इति दुर्गादासः॥

क्षवः, पुं, (क्षु शब्दे क्षुते च + भावे अप्।) क्षुतम्। राजिका। इत्यमरः॥ कासः॥ इति शब्दरत्नावली। राजिकाभेदः। तत्पर्य्यायः। क्षुधाभिजननः २ चपलः ३ दीर्घशिम्बिकः ४ सुकुमारः ५ वृत्तबीजः ६ मधुरः ७ क्षवकः ८। अस्य गुणाः। कषायत्वम्। मधुरत्वम्। शीतलत्वम्। कफपित्तश्रमहरत्वम्। रुच्यत्वम्। वृष्यत्वम्। पवनाध्मानपुष्टिदत्वञ्च। इति राजनिर्घण्टः॥

क्षवकः, पुं, (क्षु + अप् + स्वार्थे कन्।) अपामार्गः। राजिका। भूताङ्कुशः। इति राजनिर्घण्टः॥ (व्यवहारोऽस्य यथा सुरसादिगणपाठे।
"क्षवकसरसिभार्गी कासुका काकमाची
कुलहलविषमुष्टी भूस्तृणो भूतकेशी"॥
इति वाभटे सूत्रस्थाने १५ अध्याये॥)

क्षवकृत्, स्त्री, (क्षवं करोतीति। कृ + क्विप्।) छिक्किनी। इति भावप्रकाशः॥

क्षवथुः, पुं, (क्षु + अथुच्।) क्षुतम्। कासः। इति मेदिनी। कण्ठकण्डूयनम्। इति शब्दरत्नावली॥ (क्षवथुर्नाम रोगविशेषः। तस्य सकारणसम्प्राप्तिकलक्षणानि यथा,—
"तीक्ष्णघ्राणोपयोगार्करश्मिसूत्रतृणादिभिः।
वातकोपिभिरन्यैर्वा नासिका तरुणास्थनि॥
विघट्टितेऽनिलः क्रुद्धो रुद्धः शृङ्गाटकं व्रजेत्।
निवृत्तः कुरुतेऽत्यर्थं क्षवथुं स भृशं क्षवः"॥
इति वाभटे उत्तरस्थाने १९ अध्याये॥
"घ्राणाश्रिते मर्म्मणि संप्रदुष्टे
यस्यानिलो नासिकया निरेति।
कफानुयातो बहुशः सशब्द-
स्तं रोगमाहुः क्षवथुं विधिज्ञाः॥
तीक्ष्णोपयोगादतिजिघ्रतो वा
भावान् कटूनर्कनिरीक्षणाद्वा।
सूत्रादिभिर्वा तरुणास्थिमर्म्म-
ण्युद्घाटिते यः क्षवथुर्निरेति"॥
इत्युत्तरतन्त्रे द्वाविंशेऽध्याये सुश्रुतेनोक्तम्॥
चिकित्सा यथा।
"क्षेप्यं नस्यं मूर्द्धविरेचनीयै-
र्नाड्याचूर्णं क्षवथौ भ्रंशथौ च"॥
इति चात्रैव २३ अध्याये तेनोक्तम्॥ अस्य विधारणाज्जातो यः स यथा,—
"भवन्ति गाढं क्षवथोर्विघाता-
च्छिरोऽक्षिनासाश्रवणेषु रोगाः।
कण्ठास्यपूर्णत्वमतीवतोदः
कूजश्च वायोरथवा प्रवृत्तिः"॥
इति चोत्तरतन्त्रे पञ्चपञ्चाशत्तमेऽध्याये च तेनोक्तम्॥)

क्षवपत्रा, स्त्री, (क्षवः क्षुतहेतुः पत्रं यस्याः। एतत्पत्राघ्राणेन हि क्षुतं जायते। अतस्तथात्वम्।) द्रोणपुष्पी। इति राजनिर्घण्टः॥

क्षविका, स्त्री, (क्षवः क्षुतं साध्यतयाऽस्त्यस्य इति ठन् + टाप् च।) वृहतीभेदः। तत्पर्य्यायः। सर्पतनुः २ पीततण्डुला ३ पुत्रप्रदा ४ बहुफला ५ गोधिनी ६। अस्या गुणाः। "क्षविका वृहती तिक्ता कटूष्णा च तत्समा"। इति राजनिर्घण्टः॥

क्षान्तः, त्रि, (क्षम् + कर्त्तरि क्तः।) सहनशीलः। तत्पर्य्यायः। सोढ़ः २। इत्यमरः॥ क्षमान्वितः ३। इति शब्दरत्नावली॥ तितिक्षितः ४। इति जटाधरः॥ (यथा, हरिवंशे।२१।२१।
"निर्व्वैरो निर्व्वृतः क्षान्तो निर्म्ममः क्षतिरेव च"॥)

क्षान्तिः, स्त्री, (क्षम + भावे क्तिन्।) सत्यपि सामर्थ्ये अपकारिणि अपकाराचिकीर्षा। इति देवीमाहात्म्यटीकायां नागभट्टः॥ तत्पर्य्यायः। तितिक्षा २। इत्यमरः॥ सहिष्णुता ३ क्षमा ४। इति जटाधरः॥ (यथा, भगवद्गीतायाम् १८।४२।
"शमो दमस्तपः शौचं क्षान्तिरार्ज्जवमेव च"॥)

क्षान्तुः, त्रि, (क्षम् + "कमिगमिक्षमिभ्यस्तुन् वृद्धिश्च"। उणां।५।४३। इति तुन् वृद्धिश्च।) क्षमाशीलः। तत्पर्य्यायः। मर्षकः २। इत्युणादिकोषः॥

क्षान्तुः, पुं, (क्षम् + तुन् वृद्धिश्च।) पिता। इति संक्षिप्तसारोणादिवृत्तिः॥

क्षामः, त्रि, (क्षै + कर्त्तरि क्तः। "क्षायो मः"।८।२।५३। इति निष्ठा तस्य मत्वम्।) क्षीणः। अबलः। इति शब्दरत्नावली॥ (यथा, भागवते ३।२१।४६।
"विद्योतमानं वपुषा तपस्युग्रयुजा चिरम्।
नातिक्षामं भगवतः स्निग्धापाङ्गावलोकनात्"॥
स्त्रियां टाप्। यथा, मेघदूते।८६।
"आधिक्षामां विरहशयने सन्निषण्णैकपार्श्वाम्"॥
सर्व्वरूपवत्त्वात् विष्णुः। यथा, महाभारते।१३। विष्णुसहस्रनामकीर्त्तने।१४९।१०४।
"आश्रमः श्रमणः क्षामः सुपर्णो वायुवाहनः"॥)

क्षामवती, क्षामवतीष्टिः } स्त्री, (क्षामं दोषक्षयः साध्यतयास्त्यस्या मतुप् मस्य वत्वम्। स्त्रियां ङीप्। पक्षे कर्म्मधारयः।) यागविशेषः। यथा, भविष्ये।
"क्षामवत्यादिना यद्वत् कर्म्मणा एतनायते!।
दैवदोषादकरणे जाते दोषकदम्बके।
होमेनैकेन दोषाणां सर्व्वेषां क्षयमादिशेत्॥
एवञ्च एकप्रायश्चित्तेनानेकदोषक्षयाय क्षामवतीष्टिः सर्व्वत्र दृष्टान्तः"। इति प्रायश्चित्ततत्त्वम्॥

क्षामास्यं, क्ली, (क्षामस्य क्षयस्य आस्यं स्थानम्।) कुपथ्यम्। यथा, शब्दचन्द्रिकायाम्।
"अपथ्यमहितं रोग्यं क्षामास्यं परिकीर्त्तितम्"॥
पुस्तकान्तरे क्षमस्यमिति च पाठः॥

क्षारं, क्ली, (क्षरतीति। क्षर् सञ्चलने + "ज्वलितिकसन्तेभ्यो णः"।३।१।१४०। इति ज्वलादित्वात् णः।) विड्लवणम्। इति राजनिर्घण्टः॥ यवक्षारः। इति त्रिकाण्डशेषः॥

क्षारः, पुं, (क्षर् सञ्चलने + ज्वलादित्वात् णः॥) रसविशेषः। (यथा, पञ्चतन्त्रे।१।३१५।
"तातस्य कूपोऽयमिति ब्रुवाणाः
क्षारं जलं कापुरुषाः पिबन्ति"॥
अस्य गुणा यथा।
"क्षारः क्लेदं जनयति मुखे स्वादुरुष्णो विदाही
शूलश्लेष्मा रुचिमरुदवामूत्रकृच्छ्रोषणश्च।
आनाहं सन्नयति पुनर्वह्निसन्दीपनः स्या-
देवं प्रोक्तं विदितगुणकैः कोविदैः क्षारवीर्य्यम्"॥